# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| **कक्षा-शास्त्री-३** | **प्रश्नपत्रम् – ५** | **गुणाः – ७०** |
| **विषयः – पुराणेतिहासः** | **सत्रम्- ६ षष्ठम्** | **समयः- ०८:०० तः ११:००** |
| **दिनाङ्कः – ३१/०३/२०२०** | **सन्दर्भग्रन्थः – श्रीमद्भागवतमहापुराणे स्कन्ध – ९, मार्कण्डेयपुराणे - ७९ तः ९१** | |

---

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्नः १ यथेच्छं द्वयोः श्लोकयोः ससन्दर्भव्याख्यां कुरुत।** १०

१ एकदा गिरीशं द्रष्टुमृषयस्तत्र सुव्रताः।
दिशो वितिमिराभाषाः कुर्वन्तः समुपागमन्।।

२ नाभागो नभगापत्यं यं ततं भ्रातरः कविम्।
यविष्ठं व्यभजन् दायं ब्रह्मचारिणमागतम्।।

३ अङ्गदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ।
तक्षः पुष्कल इत्यास्तां भरतस्य महीपते।।

**प्रश्नः २ राज्ञः नाभागाख्यानं यथाधीतं सविस्तरं प्रतिपादयत।** १०

अथवा

सगरचरित्रं ग्रन्थोक्तदिशा चर्चयत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्नः ३ प्रदत्तेषु द्वयोः श्लोकयोः ससन्दर्भव्याख्या कार्या।** १०

१ स्वागतं ते वरारोहे आस्यतां करवाम किम्।
संरमस्व मया साकं रतिर्नौशाश्वतीः समाः।

२ ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशम्।
अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशम्।

३ यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः।
षडिमे नहुषस्यासन्निन्द्रियाणीव देहिनः।।

**प्रश्नः ४ कस्याप्येकस्य सविस्तरम् उत्तरं यच्छत।** १०

१ चन्द्रवंशवर्णनं ग्रन्थोक्तदिशा कुरुत।

२ ययाते गृहत्यागकथां यथाधीतां सविस्तरां वर्णयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ प्रदत्तेषु द्वयोः श्लोकयोः ससन्दर्भं व्याख्यां कुरुत ।** १०

१ सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः।
निशामय तदुत्पत्तिं विस्तराद् गदतो मम।।

२ अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम्।
हिमवान् वाहनं सिंहं रत्नानि विविधानि च।।

३ सर्वाबाधाविनिर्मुक्तो धनधान्यसुतान्वितः।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः।।

**प्रश्नः ६ प्रदत्तयोः प्रश्नयोः एकस्य सविस्तरम् उत्तरं लिखत।** १०

१ शक्रादिदेवैः कृतां देवीस्तुतिं संस्कृतभाषायां वर्णयत।

२ दूतदेव्योः संवादं चर्चयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ प्रदत्तेषु दशप्रश्नानां लघूत्तराणि देयानि।** १०

१ नवमस्कन्धे कति अध्यायाः सन्ति?

२ मार्कण्डेयपुराणे कति श्लोकाः सन्ति?

३ नहुषस्य कति पुत्राः आसन्?

४ ययातिः कस्य पुत्रः आसीत्?

५ कस्य तपसा गङ्गा मृत्युलोकं प्राप्ता?

६ कः पौरोहित्यम् अनिन्दयत्?

७ बुधः कस्य पुत्रः?

८ अम्बरीषचरित्रं कस्मिन् अध्याये अस्ति?

९ राज्ञः हरीशचन्द्रस्य राज्यं कः मुनिरहरत्?

१० रोहितः कस्य पुत्रः?

११ सुकन्यायाः पितुः नाम किम्?

१२ रामस्य गुरोः नाम किम्?

१३ देवीसूक्तं कस्मिन् अध्याये विद्यते?

१४ देव्यै कमण्डलुं कः ददौ?

१५ परशुरामस्य मातुः नाम किम्?

*************************